# Kapateshvaravatara Shivastotrarajah

# कपटेश्वरावतारशिवस्तोत्रराजः

## Document Information

Text title : Kapateshvara Avatara Shiva Stotrarajah

File name : kapaTeshvarAvatArashivastotrarAjaH.itx

Category : shiva, kAshmIrashaivadarshanam, stavarAja, stotra

Location : doc_shiva

Author : kAshmIrikamahAmAheshvarAchArya rAjAnaka shrI jayadrathavirachitA

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : haracharitachintAmaNiH | chaturdashaH prakAshaH - kapaTeshvarAvatAravarNanam | 136-169||

Latest update : June 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 6, 2025

*sanskritdocuments.org*

# कपटेश्वरावतारशिवस्तोत्रराजः

ॐ वृक्षैरावृतकायाय पराय परमात्मने ।
नानारूपाय देवाय नमस्तुभ्यं स्वयम्भुवे ॥ १॥

शिवाय शितिकण्ठाय सोमसूर्याग्निचक्षुषे ।
भीमाय भीमरूपाय भीषणायामृताय च ॥ २॥

चण्डाय चण्डरुद्राय चण्डशूलाग्रपाणये ।
योगिने ब्रह्मनिष्ठाय सर्वायुधधराय च ॥ ३॥

उमायाः स्वामिने तुभ्यं पशूनां पतये नमः ।
ऋग्यजुःसाममन्त्राणां त्रैलोक्यपतये नमः ॥ ४॥

चन्द्रसूर्याग्निमरुतामम्भसां पतये नमः ।
सिताय कृष्णवर्णाय पीताय कर्बुराय च ॥ ५॥

अरुणाय पिशङ्गाय सर्वोद्भवभवाय च ।
सवृषायोग्रकायाय सोमाय सगुहाय च ॥ ६॥

सगणाय नमस्तुभ्यं नमस्तेऽस्तु सनन्दिने ।
गजेन्द्रवक्त्रसहितसभृङ्गिन्टिये नमः ॥ ७॥

विश्वैः साध्यैः सुतस्त्वं हि ब्रह्मणा केशवेन च ।
सततं स्तूयसे देवैर्ऋषिभिर्भावितात्मधिः ॥ ८॥

स्तुत्यानां गुणसङ्घानां नान्तोऽस्ति तव शङ्कर ।
देवान्पितॄंश्च देवेश मुनीन्सिद्धान्प्रजापतीन् ॥ ९॥

नियुनक्षि सदा देव स्वेषु स्वेष्वेव कर्मसु ।
योगिनां योगयोनिस्त्वं योगकर्ता च शङ्कर ॥ १०॥

ध्रुवोऽव्ययो ह्यजो नित्यः संहर्ता भूतभावनः ।
विश्वरूपो ह्यनन्तश्च स्वनित्यो वृषवाहनः ॥ ११॥

अजितो ह्यप्रमेयश्च लोकालोकप्रकाशकः ।
प्रभुर्वरेण्यो भगवान्वर्णाश्रमविभागवित् ॥ १२॥

सुसूक्ष्मो ह्यव्ययो व्यापी भवार्णवतरिर्विभुः ।
त्वां न जानन्ति ये मूढा नैते यान्ति परां गतिम् ॥ १३॥

जायन्ते च म्रियन्ते च कर्मभिर्विवशीकृताः ।
जितकामा जितक्रोधा जितद्वन्द्वा जितेन्द्रियाः ॥ १४॥

त्वां ज्ञात्वा देहिनो नित्यं गच्छन्ति परमां गतिम् ।
त्र्यम्बकस्त्रिपुरेशानस्त्रिपुरघ्नो महीधरः ॥ १५॥

त्रिलोकपाता पर्जन्यः कालकामाङ्गनाशनः ।
ब्रह्मविष्णिवन्द्ररुद्राणामन्येषां चैव देहिनाम् ॥ १६॥

संहारकाले देवेश स्मृतिमाक्षिप्य तिष्ठसि ।
ध्येयस्त्वं योगनिष्ठानां मुनीनां भावितात्मनाम् ॥ १७॥

स्तुतवन्तश्च ते सर्वे सर्वदुःखविनाशनम् ।
योगिनां योगसिद्धिस्त्वं योगस्योत्पत्तिकारकः ॥ १८॥

तिष्ठ मे हृदये नित्यं वीर्यात्मा सुरसत्तमः ।
चक्षुषोर्हृदये चैव भ्रुवोर्मध्यगतस्तथा ॥ १९॥

निष्कलं ध्यायिनस्त्वां हि प्रपश्यन्ति सदाशिवम् ।
पञ्चधा त्वं शरीरेषु देहिनां सम्प्रतिष्ठसि ॥ २०॥

प्राणायामैः क्षपयसे कल्मषं विश्वसम्भवम् ।
ब्रह्मादीनां च देवानामन्येषां चैव देहिनाम् ॥ २१॥

सुखस्य दाता नान्योऽस्ति इति मे निश्चिता मतिः ।
अस्माकमपि देवेश कर्मण्युद्विग्नचेतसाम् ।
शरणं भव भीतानां संसाराध्वनि वर्तताम् ॥ २२॥

नान्या गतिर्महादेव विद्यते शरणार्थिनाम् ।
मुक्त्वा तद्भक्तिमीशान शशाङ्ककृतशेखर ॥ २३॥

तनुभिर्धारयस्येव जगत्स्थावरजङ्गमम् ।
नान्यं पश्यामि देवेश व्यापिनं सचराचरम् ॥ २४॥

अङ्गुष्ठपर्वमात्राणां जातानां ब्रह्मतेजसा ।

तपसा च महादेवाद्वाञ्छितमुत्तमं वरम् ॥ २५॥

संसारार्णवमग्नानामिच्छतां विपुलं यशः ।
अस्माकं देवदेवेश प्रसादं कर्तुमर्हसि ॥ २६॥

न ज्ञानं न च वा ध्यानं न तपो न च वै क्रतुः ।
सर्वभावविहीनानां शरणं त्वं महेश्वर ॥ २७॥

ब्रह्मविष्विन्द्रगोप्ता त्वं ब्रह्मण्यो ब्रह्मवित्तमः ।
ब्रह्मचारी परं पात्रं नीलग्रीवो गुहाशयः ॥ २८॥

फलश्रुतिः ।
एवं स्तुतो महादेवो वालखिल्यैरहर्निशम् ।
प्रीयते स्म महादेवः कपटेश्वरविग्रहः ॥ २९॥

इदं पौराणिकस्तोत्रं वालखिल्यैर्विनिर्मितम् ।
कपटेश्वरदेवस्य प्रत्यहं यः पठेन्नरः ॥ ३०॥

तस्य रोगा विनश्यन्ति धनधान्यादि वर्धते ।
आयुश्च दीर्घतां याति सन्ततिश्च प्रवर्धते ॥ ३१॥

भुक्तिमुक्तित्वमभ्येति संसारश्च विनश्यति ।
शृण्वतामपि सर्वेषामेतदेव फलं भवेत् ॥ ३२॥

यः कश्चित्पथि वा गच्छन्स्तोत्रमेतत्पठेन्नरः ।
स सर्वसिद्धिमाप्नोतीत्याज्ञा सत्या महेशितुः ॥ ३३॥

इदं पवित्रं दातव्यं पापिष्ठाय न जातुचित् ।
श्रद्धाभक्तिमनोज्ञाय दातव्यं सर्वथा पुनः ॥ ३४॥

इति काश्मीरिकमहामाहेश्वराचार्यजयद्रथविरचिते हरचरितचिन्तामणौ कपटेश्वरावतारशिवस्तोत्रराजः सम्पूर्णः ।

- ॥ हरचरितचिन्तामणिः । चतुर्दशः प्रकाशः - कपटेश्वरावतारवर्णनम् । १३६-१६९॥

- .. haracharitachintAmaNiH . chaturdashaH prakAshaH - kapaTeshvarAvatAravarNanam . 136-169 ..

Notes:

Śiva शिव in His Kapaṭeshvara Avatāra कपटेश्वरावतार, manifested as Kāśṭharūpa काष्ठरुप; that was worshipped by the Vālakhilya Ṛṣi-s वालखिल्य ऋषयः with this StotraRājaḥ स्तोत्रराजः. Renumbering has been done for the convenience of the readers.

HaraCaritaCintāmaṇiḥ हरचरितचिन्तामणिः is a Mahākāvya महाकाव्य composed by Kāśmīrika MahāMāheshvarĀcārya Rājanaka Jayadratha काश्मीरिक महामाहेश्वराचार्य राजनक जयद्रथ who is also known for his commentaries on the writings of MahāMāheshvarĀcārya Abhinavagupta महामाहेश्वराचार्य अभिनवगुप्त of Kāśmīra काश्मीर.

Several ŚivaKṣetra शिवक्षेत्र are mentioned in this composition about which the geographical references are mentioned in the publication. The location of the Kapaṭeśvara ŚivaKṣetra कपटेश्वर शिवक्षेत्र is mentioned in the publication is given below.

कपटेश्वरः कपटेशः । १४। ३४ कपटेश्वरोऽयं कपटेश्वरनाम्नैव कश्मीरैकदेश “मटन्”पुरगणे “कूठिहेर्”ग्रामे कुण्डाकृति महादेवस्थानम् । विशिष्टव्याख्यास श्रीडॉक्टरस्टैन्साहिबराजतरङ्गिण्यनुवादे १। ३२, ७। १९० द्रष्टव्या ।

काष्ठमयो देवः । १४। १३५ काष्ठमयदेव इत्यपि कपटेश्वरस्यैवान्यन्नाम ।

काष्ठरूपः । १। २९ काष्ठरूप इत्यपि कश्मीरैकदेश“मटन”पुरगणीय “कूठेर्”ग्रामे स्थितस्य कपटेश्वराख्यशिवस्यान्यन्नाम । विशिष्टव्याख्यास्य श्रीडॉक्टरस्टैन्साहिबराजतरङ्गिण्यनुवादे १। ३२ द्रष्टव्या ।

The text of the HaraCaritaCintāmaṇiḥ हरचरितचिन्तामणिः can be accessed from one of the links given below.

Encoded and proofread by Ruma Dewan

*Kapateshvaravatara Shivastotrarajah*

pdf was typeset on June 6, 2025

Please send corrections to *sanskrit@cheerful.com*